# 2025

## SANSKRIT — HONOURS

**Paper : DSCC-5**

**(Drama and Dramaturgy)**

**Full Marks : 75**

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

### Unit – I

**(Marks : 25)**

1. अधोलिखितयोः कस्य**चिदेकस्यो**त्तरं लेख्यम्। 10×1

(a) अभिज्ञानशकुन्तलनाटकस्य प्रथमाङ्कचतुष्टये कालिदासेन समङ्कितं प्रकृतिचित्रमाधारीकृत्य नातिदीर्घः प्रबन्धः लिख्यताम्।

(b) अभिज्ञानशकुन्तलनाटकस्य प्रथमाङ्के समवतारितस्य हस्तिवृत्तान्तस्य नाटकीयं तात्पर्यमालोच्यताम्।

2. अधोलिखितयोः कस्य**चिदेकस्य संस्कृतभाषया देवनागरलिप्या** च सप्रसङ्गं व्याख्या कार्या। 6×1

(a) आपरितोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञानम्।
बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः।।

(b) विचिन्तयन्ती यमनन्यमानसा
तपोधनं वेत्सि न मामुपस्थितम्।
स्मरिष्यति त्वां न स बोधितोऽपि सन्
कथां प्रमत्तः प्रथमं कृतामिव।।

3. अधोदत्तयोः **संस्कृतवाक्ययोः** कस्यच**नैकस्य** प्राकृतरूपं लिख्यताम्। 3×1

(a) इतः इतः सख्यौ।

(b) अनसूये, गमिष्याम्यहम्।

4. अधोलिखितेषु ***त्रयाणां*** प्रश्नानामुत्तरं **संस्कृतभाषया देवनागरलिप्या** च संक्षेपेण लेख्यम्। 2×3

(a) अभिज्ञानशकुन्तलनाटके कति अङ्काः सन्ति? कस्मिन् अङ्के शकुन्तला अभिशप्ता?

(b) तपस्विनः कररूपेण नृपेभ्यः किं ददति?

(c) "आश्रममृगोऽयं न हन्तव्यो न हन्तव्यः"– इति केन कं प्रति उक्तम्?

(d) विदूषकस्य नाम किम्? प्रथमाङ्के तस्योपस्थितिः लक्ष्यते न वा।

(e) राज्ञः दुष्यन्तस्य आश्रमगमनकाले महर्षिः कण्वः कुत्र किमर्थं गतवान्?

**Unit – II**

**(Marks : 20)**

5. अधोलिखितयोः कस्यचन***नैकस्य*** उत्तरं लेख्यम्।

(a) अभिज्ञानशकुन्तलनाटकस्य कस्मिन् अङ्के धीवरोपाख्यानं समवतारितम्? अनेनोपाख्यानेन नाटकीयं किमपि तात्पर्यं साधितं न वेति विचार्य तत्र प्राचीनभारतवर्षस्य समाजव्यवस्थायाः प्रतिविम्बितं चित्रमुपस्थाप्यताम्। 1+5+4

(b) का आसीत् हंसपदिका? अभिज्ञानशकुन्तलनाटकस्य कस्मिन् अङ्के तस्याः गीतं श्रूयते? गीतस्यास्य नाटकीयं तात्पर्यमालोच्यताम्। 1+1+8

6. अधोलिखितयोः यथेच्छ***मेकस्य*** **संस्कृतभाषया देवनागरलिप्या** च भावः सम्प्रसार्यताम्। 5×1

(a) हंसो हि क्षीरमादत्ते तन्मिश्रा वर्जयत्यपः।

(b) अनुभवति हि मूर्ध्ना पादपस्तीव्रमुष्णं
शमयति परितापं छायया संश्रितानाम्॥

7. अधोलिखितयोः कस्यचि***देकस्य*** वङ्गभाषया आङ्गलभाषया वा अनुवादः कार्यः। 5×1

(a) रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान्
पर्युत्सुको भवति यत्सुखितोऽपि जन्तुः।
तच्चेतसा स्मरति नूनमबोधपूर्वं
भावस्थिराणि जननान्तरसौहृदानि॥

(b) स्वप्नो नु माया नु मतिभ्रमो नु
क्लिष्टं नु तावत् फलमेव पुण्यम्।
असन्निवृत्त्यै तदतीतमेते
मनोरथा नाम तटप्रपाताः॥

## Unit – III

**(Marks : 30)**

8. अधोलिखितयोः कस्यचिदेक**कस्यो**त्तरं लेख्यम्।

(a) का प्रस्तावना? तस्याः कति भेदाः? कानि च तेषां नामानि? तेषु यथाभिमतं द्वयोः सोदाहरणं व्याख्या कार्या। 2+1+1+6

(b) नाट्यसन्धेः विश्वनाथसम्मतं लक्षणं किम्? तस्य कति भेदाः? कानि च तेषां नामानि? तेषु यथेच्छं द्वयोः सोदाहरणं व्याख्या कार्या। 2+1+1+6

9. यथाभिमतं ***विषयद्वय***मवलम्ब्य टीका लेखनीया। 5×2

(a) रूपकम्।

(b) नान्दी।

(c) पूर्वरङ्गः।

10. यथाभिमतं ***पञ्चानां*** प्रश्नानामुत्तरं **संस्कृतभाषया देवनागरलिप्या** च संक्षेपेण लेख्यम्। 2×5

(a) कः अभिनयः? स कतिविधः?

(b) विश्वनाथस्य मते कौ द्वौ रसौ नाटके अङ्गिरसरूपेण स्वीक्रियेते?

(c) नान्दी कतिविधा? तेषां नामानि लिखतु।

(d) विश्वनाथसम्मतं पताकालक्षणं लिखित्वा, उदाहरणमेकं देयम्।

(e) अर्थोपक्षेपकस्य कति भेदाः? तेषु द्वयोः नाम लिख्यताम्।

(f) का अर्थप्रकृतिः? सा कतिविधा?

(g) विश्वनाथसम्मतं भारतीवृत्तिलक्षणं लिख्यताम्।

(h) कति वृत्तयः? शृङ्गाररसे का वृत्तिः प्रयोक्तव्या?